**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN(o): 2581-6241
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 9.134
Volume - 9, Issue - 3, March - 2026

DOIs:10.2018/SS/202603003 --:-- Research Paper / Article / Review

# पर्यावरणसंरक्षणे ऋषिपरम्परायाः योगदानम्

# Contribution of Rishi Tradition in Environmental Conservation

**Dr. Amlan Acharya**
Guest Faculty, Department of Sanskrit Studies, Hyderabad Central University, Hyderabad
Email – amlanacharya47@gmail.com

**शोधसारः-** भारतीयसंस्कृतौ प्राचीनऋषिपरम्परा न केवलम् आध्यात्मिकदर्शनपरिसीमितासीत्, अपि तु मानवप्रकृत्योः संतुलितसौहार्दजीवनमार्गं प्रशस्यति स्म। वेदेषु उपनिषत्सु स्मृतिग्रन्थेषु च पर्यावरणसंरक्षणचेतना स्पष्टरूपेण प्रतिपादिता दृश्यते, यत्र नद्यः मातृरूपेण, वृक्षाः देवतुल्याः, वनानि जीवने आधारभूतानि चेति मन्यन्ते। ऋषयः "वसुधैव कुटुम्बकम्" तथा "ऋत" इत्यस्य माध्यमेन सम्पूर्णसृष्टेः संरक्षणं मानवकर्तव्यं इति संदेशमददुः। यज्ञतपोव्रतोपासना इत्यादयः आध्यात्मिकप्रथाः पर्यावरणीयसंतुलनस्य साधनानि आसन्। वैदिकेषु यज्ञेषु अग्निवाय्वम्बुधरण्यादीनां पंचमहाभूतानां शुद्धिरक्षणं वैज्ञानिकदृष्ट्या विवृतं। अथर्ववेदे औषधिपादपानाम् संरक्षणं वर्ण्यते, ऋग्वेदे नद्यः वनानि च महत्वेन गीयन्ते।

एवं ऋषिपरम्परायाः संदेशः केवलं धर्ममोक्षपर्यन्तं नासीत्, अपितु पर्यावरणसन्तुलनं सततविकासं च प्रदर्शयति स्म। अद्य वर्तमानकाले प्रदूषणवृद्धेः प्रसङ्गे यदि वयं ऋषिणां परम्परामनुसरामः, तर्हि न केवलं पर्यावरणसंरक्षणं सम्भवति, अपि तु मानवजात्यै सन्तुलितं सामञ्जस्यपूर्णं च जीवनमार्गं सुनिश्चितुं शक्यम्।

**मुख्यशब्दाः -** पर्यावरणम्, वेदः, उपनिषद्, स्मृतिग्रन्थः, संरक्षणम्, सन्तुलनम् ।

## 1. प्रस्तावना

मनुष्यः सदा प्रत्यक्षऽप्रत्यक्षतया वा प्रकृत्या सह संबद्धः अस्ति। मनुष्यप्रकृती अस्य सम्बधं च प्राचीना ऋषयः गहनतया अवगच्छन् आसन्। अत एव प्राचीनैः धार्मिकग्रन्थैः प्रकृतेः महत्वं गहनतया निरूपितम् अस्ति। पर्यावरणचिन्तनस्य संकल्पना तावत् प्राचीना यावद् मानवानाम् आस्तित्वम्। भारतीयसंस्कृतौ वृक्षारोपणं न केवलं घोषवाक्यं, अपि तु धर्मसम्मतस्य जीवनमार्गस्य श्रेष्ठतमा पद्धतिरासीदिति। अस्य प्रयोजनं अद्यतनकाले विशेषतया द्रष्टव्यं, यतो हि पर्यावरणस्य असंतुलनं वनस्य अविवेकीयं छेदनमस्ति, तस्मात् सर्वेषां जीवनम् अद्य संकटग्रस्तं स्थितम्। प्राचीनभारतीयाचार्यैः पुनः पुनः निर्दिष्टं दृश्यते यत्—मनुष्यः स्वेच्छाः संयम्य, प्राकृतिकसंपत्तिभ्यः तावदेव स्वीकरोतु, यावत् जीवननिर्वाहणाय अलमस्ति।

पर्यावरणसंरक्षणम् अद्यतनस्य प्रमुखचिन्तासु अन्यतमम् अस्ति, परन्तु तत्सम्बद्धा जागरूकता अस्माकं प्राचीनभारतीयसभ्यतायां अतीव प्राचीना आसीत्। वेदाः सर्वधर्माणि समाविशन् ज्ञाननिधीरूपेण विराजन्ते, यत्र जीवनस्य प्रकृतेः च सम्बन्धस्य विस्तृतज्ञानं भवति। भारतस्य ऋषिपरम्परा प्राचीनकालात् प्रकृत्या सह सद्भावेन जीवितुं पर्यावरणस्य रक्षणाय च प्रेरयति। अस्माकं ऋषयः न केवलं आध्यात्मिकज्ञानस्य प्रसारं कृतवन्तः, अपितु प्रकृतेः प्रत्येकं तत्वं वायु-जल-अग्नि-पृथिवी-आकाशान् च - ईश्वरसदृशाः इति मत्वा रक्षणं कर्तुं अस्मान् शिक्षयन्ति स्म। भारतीयदर्शनं "वसुधैव कुटुम्बकम्" इत्युक्त्या समस्तं विश्वं एकं कुटुम्बं पश्यति। यत्र वनानि, नद्यः, पर्वताः, पशवः, विहङ्गमाः च आत्मवत् दृष्टाः। ऋषयः अरण्येषु निवसन्तः प्रकृतेः संरक्षणं स्वधर्मरूपेण स्वीकृतवन्तः। वेदेषु अपि अस्य विषये स्पष्टं प्रतिपादनं दृश्यते।

**Shikshan Sanshodhan** : Journal of Arts, Humanities and Social Sciences
Monthly, Peer-Reviewed, Refereed, Indexed Journal
Volume - 9, Issue - 3, March - 2026
ISSN(o): 2581-6241
Impact Factor: 9.134

### 2.वेदेषु पर्यावरणसंरक्षणचिन्तनम्

- **ऋग्वेदे – "पृथ्वी पूः च उर्वी भव"**[i] अर्थात् समग्रा पृथिवी पर्यावरणं च शुद्धं तिष्ठेत्, नद्यः पर्वताः वनानि च सर्वे स्वच्छाः तिष्ठेयुः। अत्र पर्यावरणं स्वच्छं भवतु इति कामना अस्ति, एवं प्रकारेण वयं न केवलं स्वस्य अपितु भविष्यतां जनानां कृते अपि स्वस्थजीवनं सुनिश्चितं कर्तुं शक्नुमः।
- वायुप्रदुषणं निवारयितुं उक्तं – **पुनः यददो वात ते गृहे अमृतस्य निधिर्हित। तेन नो देहि जीवसे।**[ii] अर्थात् वायौ अमृतत्वं (Oxygen) विद्यते, तस्य नाशः मा भवतु इति । अर्थात् एतादृशं किमपि कार्यं न कुर्वन्तु येन वायोः अमृतत्वस्य नाशः भवति।
- पुनः यजुर्वेदे - **द्यां मा लेखीः। अन्तरिक्षं मा हिंसीः। पृथिव्याः सम्भव। अयम् हि त्वा।**[iii] अर्थात् आकाशं मा कृषिः, अन्तरिक्षं प्रति हिंसा मास्तु, पृथीव्यां यत्नपूर्वकं तिष्ठतु , एतद् एव तव धर्मः।
- **ॐ द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः –** अर्थात् आकाश-अन्तरिक्ष-पृथिवी-जल-ओषध-वनानि शान्तिं प्राप्नुवन्तु। मन्त्रोऽयं पर्यावरणस्य शान्तेः सामञ्जस्य च प्रेरकः अस्ति।
- **अथर्ववेदे - मा हिंसीः सर्वभूतानि माशीर्वदभिषेचनः।**[iv] **-** अर्थात् कस्यापि प्राणिनां प्रति हिंसा मास्तु, सर्वैः सह करुणापूर्णं व्यवहरतु।
- **अथर्ववेदे** – **माता भूमिः पुत्रोऽहं पृथिव्याः। पर्जन्यः पिता स ऊ नः पिपर्तु।।**[v] इति कथ्यते। अत्र पृथ्वी (भूमिः)-मातृरूपेण, पर्जन्य (मेघः इत्यादि)-पितृरूपेण तथा मानवानां पालनकर्ता इव प्रतिपादनम् वर्तते।

सर्वदा स्वार्थ्यं त्यक्त्वा सामाजिकल्याणाय दृष्टिः भवेत्। प्रकृतेः सह मनुष्यः सर्वदा सह-अस्तित्वभावः वर्धयेत्। वस्तुतः पर्यावरणमेव मानवजीवनस्य मूलाधारः अस्ति। अतः अस्माकं कर्तव्यमस्ति यत् मानवकल्याणाय पर्यावरणेन सह मैत्रीपूर्णं व्यवहारं भवतु। यजुर्वेदे चराचरं सर्वं मित्रदृष्ट्या द्रष्टव्यम् इति सन्देशः प्रदत्तः –

**मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे**
**मित्रस्य चक्षुष समीक्षा महे।**[vi]

अपि च अन्यमेकं उदाहरणम् –

**सुमित्रिया न आप ओषधयः संतु दुर्भित्रियास्तस्मै**
**संतु योस्मान दृष्टि यं च वयं द्विष्मः।**[vii]

अत एव यदा पर्यावरणस्य प्रति मानवे मैत्रीभावः भविष्यति, तदा एव सः पर्यावरणं रक्षितुं शक्नोति। मनुष्येण अवश्यं कर्तव्यं यत् सः स्वसमीपस्थिताः प्राकृतिकसम्पदः मित्ररूपेण मन्यमानः तासां यथायोग्यं उपयोगं कुर्यात्।

अपि च शान्तिमन्त्रेषु अपि पर्यावरणं चिन्तनं दृश्यते। स्वस्तिवचने शान्तिपाठे च पठितानां मन्त्राणां तात्पर्यं भवति यत् पर्यावरणस्य स्वास्थ्यं शान्तिश्च मानवकल्याणाय एव भवति। वैदिकमन्त्रेषु सर्वाधिकं लोकप्रियः शान्तिपाठमन्त्रः आकाश-अन्तरिक्ष-जल-पृथिवी-वनस्पति-आकाशादिनां शान्तिं प्रार्थयति –

**ॐ द्यौः शान्तिरन्तरिक्षं शान्तिः**
**पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः ।**
**वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः**
**सर्वं शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥**
**ॐ शान्तिः शान्तिः शान्तिः ॥**[viii]

यज्ञविधिना प्राकृतिकसंतुलनं भवति इति वेदे उक्तम्। शतपथब्राह्मणे यज्ञः प्रजापतिः इति उच्यते। श्रुतिषु यज्ञः श्रेष्ठकर्मः उच्यते – "**यज्ञो वै श्रेष्ठतमं कर्म**"।[ix] यज्ञमाध्यमेन पर्यावरणसंरक्षणं, वायुमण्डलक्षयस्य निवारणं, शारीरिकरोगाणां मुक्तिः च प्राप्तुं शक्यते। वायुमण्डले oxygen (O2), Carbon dioxide (CO2) च इत्येतयोः सन्तुलनं यज्ञेन निर्वाह्यते। अत एव यज्ञः वैज्ञानिकप्रक्रिया उच्यते । अतः यजुर्वेदे यज्ञः सृष्टिचक्रस्य नाभिः उच्यते – "**अयं यज्ञो भुवनस्य नाभिः**"।[x]

अद्य वैश्विकतापनस्य कारणात् ऋतुचक्रं असन्तुलितं भवति। वर्षा अभावेन भूजलस्तरः अधः गच्छति। वेदेषु सहस्रवर्षपूर्वं ऋषिभिः उक्तं यत् यज्ञेन वृष्टिः भवति – "**भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः**"॥[xi] एवं पर्यावरणस्य सन्तुलनं रक्षणाय यज्ञस्य महत्वं दर्शितं ऋषिभिः।

### 3.उपनिषत्षु पर्यावरणसंरक्षणचिन्तनम्

उपनिषन्मन्त्रेषु पर्यावरणसंरक्षणस्य भावना विचाराः च स्पष्टतया विद्यमानाः सन्ति। एतैः मन्त्रैः प्रकृतिः तस्य तत्वानि च (यथा पृथिवी, जलं, अग्निः, वायुः, आकाशः) पवित्राणि दिव्यानि च मन्यन्ते, येषां संरक्षणं श्रद्धया क्रियते। उपनिषत्सु समग्रा सृष्टिः परमात्मा ब्रह्म रूपेण वा पश्यति, तस्मात् स्पष्टं भवति यत् प्रकृतेः रक्षणम् अस्माकं धार्मिकम् आध्यात्मिकं च कर्तव्यमस्ति। यथा ब्रह्माण्डस्य एकत्वं प्रतिपादने ईशावास्योपनिषदि –

**"ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।**
**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्"॥**[xii]

इत्यत्र स्पष्टं सूच्यते यत् विश्वं ईशावास्यं, तस्मात् त्यागबुद्ध्या, यथायोग्यं च उपभोगः करणीयः। भोगपरता, लालसा, अतिव्ययः इत्येते दोषाः पर्यावरणविनाशस्य मूलकारणानि सन्ति। अपि च छान्दोग्योपनिषदि उल्लेखो वर्तते यत् सम्पूर्णं जगत् एकमेव तत्त्वं अस्ति —"**सर्वं खल्विदं ब्रह्म**"[xiii] इति। अस्य वाक्यस्य तात्पर्यं यत् – सम्पूर्णं यत् किञ्चिदस्ति, तत् ब्रह्मैव। अयं दृष्टिकोणः केवलं आध्यात्मिकं न, अपि तु पार्थिवजीवने अपि सन्निहितम्। यदा सर्वं ब्रह्मस्वरूपं मन्यते, तदा वृक्षाणां छेदनम्, जलस्य दूषणं, जीवानां हिंसा चेत्येषां कृत्यानां नैतिकदोषः जाग्रतं भवति।

अपि च वायोः आकाशस्य च महत्वं प्रतिपादनाय उच्यचे यत् – "**वायुरेवायं वायुरिदं सर्वम्" (छान्दोग्योपनिषद्), "आकाशो वै नाम" (तैत्तिरीयोपनिषद्)।** अर्थात् इदं सर्वं जगत् वायुः आकाशश्च अस्ति। अतः तेषां रक्षणम् अस्माकं धर्मः। अपि च मत्स्यपुराणे –

**दशकूपसमा वापी, दशवापीसमः ह्रदः।**
**दशह्रदसमः पुत्रो, दशपुत्रसमो द्रुमः॥**[xiv]

अर्थात् एकः वृक्षः दशपुत्राणाम् तुल्यः। श्लोकोऽयं दर्शयति यत् भारतीयसाहित्ये पर्यावरणरक्षणस्य चिन्तनं बहु प्राचीनमस्ति। वृक्षस्य मूल्यं पुत्रादपि अधिकं मन्यते। अतः वृक्षारोपणं, वृक्षसंरक्षणं च मानवधर्मः एव इति उपदिशति।

### 4.स्मृतिग्रन्थेषु पर्यावरणसंरक्षणचिन्तनम्

भारतीयप्राचीनसाहित्ये स्मृतिग्रन्थाः धर्मशास्त्ररूपेण प्रसिद्धाः सन्ति। एतेषु न केवलं सामाजिकनियमाः निर्दिष्टाः, अपि तु पर्यावरणस्य रक्षणम् अपि अत्यन्तं महत्वपूर्णं विषयत्वेन निरूपितम् अस्ति। स्मृतिग्रन्थेषु पर्यावरणसंरक्षणसंबद्धाः अनेके श्लोकाः स्पष्टतया दृश्यन्ते, विशेषतस्तु मनुस्मृतौ याज्ञवल्क्यस्मृतौ च वृक्षवनस्पतिजलजीवजन्तूनां संरक्षणसन्देशः वर्तते। यथा–

**नाप्सु मूत्रं पुरीषं वा स्थीवनं वा समुत्सृजेत्।**
**अमेध्यमलिप्तमन्यद्वा लोहतं वा विषाणि वा॥**[xv]

अर्थात् जले मूत्रमलश्लेष्मरुधिरविषकीटकीचादीनि नोत्स्रष्टव्यानि, तेन जलं दूष्यते पर्यावरणे च दुष्प्रभावः जायते। अपि च याज्ञवल्क्यस्मृतौ बहूनि विधानानि सन्ति याः पर्यावरणरक्षणं प्रोत्सहन्ति। तत्र वृक्षेषु छेदनं कुर्वन्तः दण्डेन दण्डनीयाः सन्ति। यथा –

**चैत्यश्मशानसीमासुपुण्यस्थाने सुरालये।**
**जातद्रुमाणांद्विगुणोदमोवृक्षेषुविश्रुते॥**[xvi]

### 5. निष्कर्षः

भारतीयऋर्षिपरम्परा प्रकृतिसंरक्षणस्य आदर्शं स्थापितवती। प्राचीनाः ऋषयः भूमेः, जलस्य, वायोः, अग्नेः, आकाशस्य च देवत्वं स्वीकृत्य तेषां संरक्षणं धार्मिक-आध्यात्मिक-बौद्धिक दृष्ट्या आवश्यकम् इति प्रतिपादयन्ति। वेदेषु, स्मृतिषु, महाकाव्येषु च पर्यावरणरक्षणस्य संदेशाः स्पष्टम् दर्शयन्ति। वृक्षारोपणम्, जीवरक्षा, यज्ञादि क्रियायाः माध्यमेन वातावरणस्य शुद्धिः, हिंसाया निषेधः एते सर्वे ऋषिपरंपरायाः योगदानरूपेण पर्यावरणसंरक्षणे स्वीक्रियन्ते। अतः ऋषिपरम्परा न केवलं आध्यात्मिकतया, अपितु व्यावहारिकदृष्ट्या पर्यावरणरक्षणे अमूल्यं योगदानं प्रदत्तवती।

**सन्दर्भाः**

---

[i] ऋग्वेदः १.१८९.२

[ii] ऋग्वेदः १०.१८६.३

[iii] यजुर्वेदः ५.४३

[iv] अथर्ववेदः ३.३०.८

[v] अथर्ववेदः १२.१.१२

[vi] यजुर्वेदः ३६.१८

[vii] यजुर्वेदः ३८.२३

[viii] यजुर्वेदः ३६.१७

[ix] शतपथब्राह्मणम् १/७/१/५

[x] यजुर्वेदः २३.६२

[xi] ऋग्वेदः १.१६४.५१

[xii] ईशावास्योपनिषद् १.१

[xiii] छान्दोग्योपनिषद् ३.१४.१

[xiv] मत्स्यपुराणम् १५४.५१२

[xv] मनुस्मृतिः ४.५६

[xvi] मनुस्मृतौ दण्डपारुष्यप्रकरणे, श्लोकः २२८

**सन्दर्भग्रन्थसूची –**

1. Vannucci, Marta. *Ecological Readings in the Veda: Matter, Energy, Life*. D.K. Printworld Pvt. Ltd., 1994.
2. Prime, Ranchor. *Vedic Ecology: Practical Wisdom for Surviving the 21st Century*. Mandala Publishing, 2002.
3. Mishra, Shivshankar. *भारतीय चिंतन परम्परा में प्रकृति संरक्षण: Environmental Protection in Indian Thought*. Eastern Book Linkers, 2018.
4. Bargah, Rohit Kumar. *पर्यावरण एवं आपदा प्रबंधन (Paryaavaran Evam Aapada Prabandhan)*. Walnut Publication, 2023.
5. Kashyap, Keshav Kishore, editor. *याज्ञवल्क्यस्मृति / Yagyavalkya Smriti*. Chaukhamba Krishnadas Academy, 2024.
6. Upadhyay, Rajendra, editor. *Manusmriti*. Bharatiya Vidya Sansthan, 2012.
7. Vedalankar, Jagannath. *ईशोपनिषद् / Ishopanishad*. Sri Aurobindo Ashram, 2017.
8. *Chandogya Upanishad*. Translated by Gita Press, 29th ed., Gita Press, 2025.